**दिनाङ्क :- 21.07.2024**
**प्रात: - 06: 55**

## अथ वार्ता:

### प्रधानमन्त्री/विश्व-रिक्थ-समितिः:

प्रधानमन्त्री नरेन्द्र-मोदी अद्य सायं सप्तवादने नवदिल्ल्यां भारत-मण्डपे विश्व-रिक्थ-समिते: षट्चत्वारिंशत्तमं सत्रम् उद्घाटयिष्यति। अत्रावसरे श्रीमोदी तत्र उपस्थितं सम्मान्यम् अतिथिवृन्दम् अपि संबोधयिष्यति।

### प्रधानमन्त्री/न्यूजीलैंडम्

प्रधानमन्त्री नरेन्द्र-मोदी न्यूजीलैंड-प्रधानमन्त्रिणा क्रिस्टोफर-लक्सनेन समं दूरभाषिक-सम्भाषणम् अनुष्ठितवान्। संभाषणावधौ उभौ नेतारौ आगामि-वर्षेषु द्विपाक्षिक-सहयोगं विवर्धितुं स्व-स्व-प्रतिबद्धतां पुनरूदीरितवन्तौ।

### वित्तसङ्कल्पनासत्रम्/उपवेशनम्

सर्वकारेण संसदः वित्त-सङ्कल्पना-सत्रात् पूर्वम् अद्य सर्वदलीयोपवेशनम् आकारितम् अस्ति। उपवेशनावधौ सर्वकारः संसदः उभयोः सदनयोः सुचारु-सञ्चालनाय सर्वाणि विपक्षिदलानि सहयोगाय प्रार्थयिष्यति । वित्त-सङ्कल्पना-सत्रं सोमवासरात् समारभ्य आगामिमासस्य द्वादश-दिनाङ्कं यावत् प्रचलिष्यति। महा-वित्तसङ्कल्पना-प्रपत्रं मङ्गलवासरे प्रस्तोष्यते। एतत् खलु नरेन्द्रमोदि-सर्वकारस्य तृतीयकार्यकालस्य प्रथमं वित्त-सङ्कल्पना-सत्रम् अस्ति । विगते मासे संसदः सदनयोः संयुक्तोपवेशनं सम्बोधयन्ती राष्ट्रपतिः द्रौपदी-मुर्मुः अकथत् यत् एतत् वित्तसङ्कल्पना-प्रपत्रं सर्वकारस्य दूरगामि-नीतीनां भविष्यत्कालिकोद्देश्यानां च प्रभाविप्रमाणं भविष्यति।

### नीट-परीक्षापरिणामः

राष्ट्रिय-परीक्षाभिकरणेन एन्.टी.ए. इत्यनेन नीट-स्नातक-प्रवेश-परीक्षायाः परिणामः परीक्षा-केन्द्रानुसारं स्वकीयान्तर्जालपटले उद्घोषितः। अभिकरणेन सर्वोच्च-न्यायालयस्य निर्देशानन्तरं परिणामः अन्तर्जालपटले प्रकाशित: । इतः पूर्वं न्यायालयेन एन्.टी.ए.-

प्रत्याशिनां परिचयरहितः परीक्षापरिणामः परीक्षाभिकरणस्य स्वकीये अन्तर्जालपटले ह्य: द्वादशवादनं यावत् प्रकाशितुं निर्दिष्ट: आसीत् । परीक्षापरिणामः neet.ntaonline.in इति अन्तर्जालपटले समुपलब्ध: अस्ति ।

**बांग्लादेश:/विरोधप्रदर्शनम्**

बांग्लादेशे प्रवर्तमानम् आरक्षण-विरोधि-प्रदर्शनम् अभिलक्ष्य प्रदर्शनकारिणां सुरक्षाबलानां च मध्ये जाते सङ्घर्षे न्यूनातिन्यूनाः चतुरधिकैकशतं जनाः मारिताः, पञ्चशताधिक-द्विसहस्रं जनाः च व्रणिताः जाताः येन भारतीयच्छात्राः भारतं प्रत्यावर्तितुं विवशाः अभवन् । अवधेयं यत् प्रतिवेशि-देशे प्राशासनिक-सेवासु पुनरारक्षणं विरुध्य केभ्यचित् सप्ताहेभ्यः व्यापकं विरोध-प्रदर्शनं प्रचलति । उत्तरप्रदेश-हरियाणा-मेघालय-जम्मू-कश्मीर-राज्याणां छात्राः सुरक्षानुरक्षण-माध्यमेन षट्-होरात्मिकां चिरयात्रां विधाय पूर्वोत्तर-सीम्नः भारतं प्रत्यावर्तिताः। छात्राणां, सर्वकार-समर्थकानां-सुरक्षा-बलानां च मध्ये सङ्घर्षः विगते मासे समारब्धः, सोमवासरे सङ्घर्षः विवर्धितः यदा ढाका-विश्वविद्यालये छात्राणां मध्ये विवादः आरब्धः।

**विदेशसचिवः/भूटानयात्रा**

विदेश-सचिवः विक्रम-मिस्री तस्य भूटानीयः समकक्षः औम-पेमा-चोडेनः च ह्य: भूटाने तृतीयस्य भारत-भूटान-विकास-सहयोग-संवादस्य सहाध्यक्षताम् अकुरुताम्। उपवेशनावधौ विदेश-सचिवौ त्रयोदश्या: पञ्चवर्षीय-योजनाया: अन्तर्गतं विकाससहयोगस्य विभिन्नक्षेत्रेषु कार्यान्वयनशैल्याः सहयोगस्य च समीक्षां कृतवन्तौ ।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

**क्रिकेट्**

महिलानाम् एशिया-चषक-विंशति-विंशति-क्षेपचक्रीय-क्रिकेट्-स्पर्धा-मालिकायाम् आतिथेयेन श्रीलंका-दलेन अतिथिं बांग्लादेशदलं सप्त-क्रीडकैः पराजितम्। श्रीलंकायाः दाम्बुलायाम् अद्य भारतीय-महिला-क्रिकेट्-दलं संयुक्तारबामीरातं सम्मुखीकरिष्यति।

**।। इति वार्ता: ।।**